सत्कायदृष्टिश्च घनास्य भोति उदीर्यते क्रोधबलं च तस्य।
संरागु तस्यातिभृशं च भोति तिर्याणयोनीषु[1] च सो सदा रमी ॥ १३४ ॥
सचेदहं शारिसुताद्य तस्य परिपूर्णकल्पं प्रवदेय दोषान्।
यो ह्यी ममा एतु क्षिपेय[2] सूत्रं पर्यन्तु दोषाण न शक्य गन्तुम् ॥ १३५ ॥
संपश्यमानो इदमेव चार्थं त्वां संदिशामी[3] अहु शारिपुत्र ॥
मा हैव त्वं[4] बालजनस्य अग्रतो भाषिष्यसे सूत्रमिमेवरूपम् ॥ १३६ ॥
ये तू इह व्यक्त बहुश्रुताश्च स्मृतिमन्त ये पण्डित ज्ञानवन्तः।
ये प्रस्थिता उत्तममग्रबोधिं तान्श्रावयेस्त्वं परमार्थमेतत् ॥ १३७ ॥
दृष्टाश्च येह्यी बहुबुद्धकोट्यः कुशलं च ये रोपितमप्रमेयम्।
अध्याशयश्चा दृढ येष[5] च स्यात्तान्श्रावयेस्त्वं परमार्थमेतत् ॥ १३८ ॥
ये वीर्यवन्तः सद मैत्रचित्ता भावेन्ति[6] मैत्रीमिह दीर्घरात्रम्।
उत्सृष्टकाया तथ जीविते च तेषामिदं[7] सूत्र भणेः समीक्षम् ॥ १३९ ॥
अन्योन्यसंकल्प सगौरवाश्च येषां च बालेहि[8] न संस्तवो[9] ऽस्ति।
ये चापि तुष्टा गिरिकन्दरेषु तान्श्रावयेस्त्वं[10] इद[11] सूत्र भद्रकम् ॥ १४० ॥

---

1) हि A. B.
2) क्षिपेत O. B. K. क्षिपेय A. W. क्षिपित्व Cb.
3) संधितस्याम्यहु Cb. संदिशामि O.
4) मार्षो हे ख त्वं A. मा खे हु त्वं B. मा ह्वो खु तं Ca. मा खा हु त्वं Cb. मा खो हु त्वं K. मा खो हु त्वं W. मा त्वमिद O. Our reading conjectural.
5) ष K. O. षु the others.
6) भवेन्ति Cb. K. भवन्ति B. भावेन्ति O. भवित्वा A. W.
7) मं B. K.
8) षु A. Ca. Cb. W. न O.
9) सम्भवो K.
10) यस्व O.
11) म A. B. K. W. द Cb. O.

तथैव चास्माक[1] विनायकेन हीनाधिमुक्तिन[2] विजानियान[3] ।
न श्रावितं बुद्ध भविष्यथेति यूयं किल श्रावक मह्य पुत्राः ॥ ३६ ॥
अस्मांश्च अध्येषति लोकनाथो ये प्रस्थिता उत्तममग्रबोधिम् ।
तेषां वदे[4] काश्यप मार्गमुत्तरं[5] यं मार्ग[6] भावित्व[7] भवेयु बुद्धाः ॥ ३७ ॥
वयं च तेषां सुगतेन प्रेषिता बहुबोधिसत्त्वान महाबलानाम् ।
अनुत्तरं मार्ग[8] प्रदर्शयाम[9] दृष्टान्तहेतूनयुतान कोटिभिः ॥ ३८ ॥
श्रुत्वा च अस्माक जिनस्य पुत्रा बोधाय भावेन्ति सुमार्गमग्र्यम् ।
ते व्याक्रियन्ते च तदास्मि तस्मिन्[10] भविष्यथा बुद्ध इमस्मि लोके ॥ ३९ ॥
एतादृशं कर्म करोम तायिनः[11] संरक्षमाणा इम धर्मकोशम् ।
प्रकाशयन्तश्च जिनात्मजानां विश्वासिकस्तस्य यथा नरः सः ॥ ४० ॥
दरिद्रचिन्ताश्च विचिन्तयाम विघ्रापयन्तो इम[12] बुद्धकोशम्[13] ।
न चैव प्रार्थेम जिनस्य ज्ञानं जिनस्य ज्ञानं च प्रकाशयामः[14] ॥ ४१ ॥

---

1) कं A. K. कु Ca. क Cb. W. O. P.

2) क्तिं च A. B. Ca. W. क्तिव Cb. O. क्तिस्व K. P. It ought to be क्तान.

3) नं A. W. नः B. न् Ca. न Cb. K. P.

4) च ते K. P. देशेहि त्वं O.

5) एतमर्थं B. एवमर्थं W.

6) र्ग A. B. Cb. W. O. र्गु Ca. र्गं K.

7) Sic all for भवित्व.

8) र्ग A. B. Cb. K. W. O. P. र्गु Ca.

9) मो Ca. प्रकाशयाम Cb. प्रदापेम W.

10) तस्मि O.

11) नां A. O. नः Ca. Cb. K. W. P.

12) इम Ca. Cb. K. P. O. इमु A. W.

13) घोषं Cb. K.

14) A. W. read this half a line as प्रकाशयामो इममग्रबोधिं.

त्यायनः प्रवेपमानैः कायैर्भगवत्तमानिमिषैर्नेत्रैर्व्यवलोकयन्ति स्म । तस्यां च वेलायां पृथक्पृथङ्[1]नःसंगीत्येमा गाथा अभाषन्त[2] ॥

अर्हन्त हे महावीर शाक्यसिंह नरोत्तम[3] ।
अस्माकमनुकम्पाय बुद्धशब्दमुदीरय ॥ १० ॥
अवश्यमवसरं ज्ञात्वा अस्माकं पि नरोत्तम[4] ।
अमृतेनेव सिञ्चित्वा व्याकुरुष्व[5] विभो जिन[6] ॥ ११ ॥
दुर्भिक्ष[7] आगतः कश्चिन्नरो लब्धा सुभोजनम् ।
प्रतीक्ष भूय उच्येत हस्तप्राप्तस्मि भोजने ॥ १२ ॥
एवमेवोत्सुका अस्मो[8] हीनयानं त्रिचिन्तय[9] ।
दुष्कालभग्नसत्त्वा[10] वा बुद्धज्ञानं लभामहे ॥ १३ ॥
न तावदस्मान्संबुद्धो व्याकरोति महामुनिः ।
यथा हस्तस्मि प्रक्षिप्तं न तद्भुञ्जीत भोजनम् ॥ १४ ॥
एवं च उत्सुका वीर श्रुत्वा घोषमनुत्तरम् ।
व्याकृता यद्[11] भेष्यामस्तदा[12] भेष्याम निर्वृताः ॥ १५ ॥

---

1) Read with O. नमः समसं.

2) भाषंते स्म B. K.

3) मा: A. म B. म: Cb. K. मा W.

4) म: B. K. W. Quite different in O. आशयं तारमस्माकं कदास्म व्याकरिष्यसि.

5) व्याकुरुष्व वि A. K. W. व्याकरिष्यति B. Cb.

6) The dialect requires व्याकरोहि; cp. vs. 16. नं A. न: B. Cb. K.

7) MSS. दुर्भिक्षादा. A var. r. has क्ष आ.

8) अस्म A. B. अस्मे Cb. O. अस्मो K. अस्य W.

9) ये A. W. त्त B. त्तय Cb. तयः K. त्तया O.

10) सत्त्वभग्ना A. भग्नसत्त्वो B. Cb. W. भग्नसत्त्वा K. दुर्भिक्षे यथ भक्तार्थी बुद्धयानं काय लभेत् O.

11) यदि K. W. यद् भेष्याम O.

12) तथा K.

[1]द्वितियं तृतीयं पि च एव निक्षिपेत् सर्वं पि सो निक्षिपि तं रजो गतम् ।
रिक्ता भवेत इयं[2] लोकधातुः सर्वश्च सो पांसु भवेत क्षीणः[3] ॥ ३ ॥
यो लोकधातूषु भवेत तासु पांसु रजो[4] यस्य प्रमाणु नास्ति ।
रजं करित्वान अशेषतस्तं लक्ष्यं[5] ददे कल्पशते गते च ॥ ४ ॥
एवाप्रमेया बहुकल्पकोट्यः परिनिर्वृतस्य सुगतस्य तस्य ।
परमाणु सर्वे[6] न भवन्ति लक्ष्या[7]स्तावद्बहु क्षीण भवन्ति कल्पाः[8] ॥ ५ ॥
तावच्चिरं निर्वृतु तं विनायकं ताञ्श्रावकांस्तांश्च पि बोधिसत्त्वान् ।
एतादृशं ज्ञानु तथागतानां स्मरामि सर्वाण्यथ अद्य श्वो वा ॥ ६ ॥
एतादृशं भिक्षव ज्ञानमेतद[9]नन्तज्ञानस्य तथागतस्य ।
बुद्धं मया कल्पशतैरनेकैः स्मृतीय सूक्ष्माय अनास्रवाय ॥ ७ ॥

तस्य खलु पुनर्भिक्षवो महाभिज्ञाज्ञानाभिभुवस्तथागतस्यार्हतः सम्यक्संबुद्धस्य चतुष्पञ्चाशत्[10]कल्पकोटीनि[11]युतशतसहस्राण्यायुष्प्रमाणमभूत् ॥

पूर्वं[12] च स भगवान्महाभिज्ञाज्ञानाभिभूस्तथागतो ऽनभिसंबुद्धो ऽनुत्तरां सम्यक्संबो-

---

1) This quarter is left out in A. MSS. द्वितीयं.

2) इह B.

3) णां A. W. णाः B. Cb. णः K.

4) रजं O. conform to the dialect of the verse.

5) तं A. B. Cb. क्ष्यन् K. क्ष्ये W. क्ष्यं O. and स्मिन् for च. Perhaps the original reading was गतेहि.

6) ण in all MSS.

7) MSS. लक्षा.

8) This quarter is left out in Cb.

9) तद् तमनन्त K.

10) चतुष्पंचा A. W. चतुः B. Cb.

11) नि A. B. न Cb. K. O.

12) पूर्वं च in Cb. O. only.

अविद्य आदीकरियाण[1] चक्षुमान्प्रभाषते न मरणान्तदुःखम्[3] ।
जातिप्रसूता इमि सर्वदोषा मृत्युं च मानुष्यमिमेव जानथ ॥ ७४ ॥
समनन्तरं भाषितु[4] धर्म तेन बहुप्रकारा विविधा अनन्ताः ।
अुत्रानशीतीनयुतान[5] कोट्यः सत्त्वाः स्थिताः श्रावकभूतले लघुम्[6] ॥ ७५ ॥
क्षणं द्वितीयं अपरं अभूषि जिनस्य तस्यो[7] बहुधर्म भाषतः ।
विशुद्धसत्त्वा यथ गङ्गवालुकाः[8] क्षणेन ते श्रावकभूत[9] आसीत् ॥ ७६ ॥
ततोत्तरी[10] अगणियु[11] तस्य आसीत्संघस्तदा लोकविनायकस्य ।
कल्पान कोटीनयुता गणेन्त[12] एकैक[13] नो चान्तु[14] लभेय तेषाम् ॥ ७७ ॥
ये चापि ते षोडश राजपुत्रा ये औरसा चैलकभूत[15] सर्वे ।
ते श्रामणेरा अवचिंसु[16] तं जिनं प्रकाशया[17] नायक अग्रधर्मम् ॥ ७८ ॥

---

1) आदि A. W. आशी B. Cb. आदी K. O.
2) णाय K.
3) All but O. मरणामनन्त.
4) त K. O.
5) Left out in Cb.
6) भूमिये लघु O.; the others भूतलेघुम्.
7) तस्य O., preferable.
8) लि Cb. K. W. O.
9) भूमि B. K. सर्वि Cb. O.
10) रं A. read रिं.
11) य A. B. W.
12) गणेन्तो K. गणेया O.
13) कु Cb. K. कि O.
14) न्त A. Cb. K. W. न्तु B. नो च लभेत अन्तम् O. The others have लभेयु.
15) बल A. चेह्ल B. K. वेह्ल Cb. चेल W. चेड O.
16) °चित्सु K. चिन्सु O.
17) शय O.; correctly.

